पूर्यमाणः, [1]प्रपूर्यमाणः, पुपूरिषमाणः, पोपूर्यमाणः ;
पूरिष्यमाणः, पूरयिष्यमाणः, पुपूरिषिष्यमाणः, पोपूरिष्यमाणः ;
पूः-पूरौ-पूरः ; — — —
[2]पूर्णम्-पूर्णः-पूर्णवान्, [3]पूर्णः-पूरितः, पुपूरिषितः, पोपूरितः-तवान् ;
पूरः, [4]पूरणः, पूरः, पुपूरिषुः, पोपूरः ;
पूरितव्यम्, पूरयितव्यम्, पुपूरिषितव्यम्, पोपूरितव्यम् ;
पूरणीयम्, पूरणीयम्, पुपूरिषणीयम्, पोपूरणीयम् ;
पूर्यम्, पूर्यम्, पुपूरिष्यम्, पोपूर्यम् ;
पूर्यमाणः, पूर्यमाणः, पुपूरिष्यमाणः, पोपूर्यमाणः ;
पूरः, पूरः, पुपूरिषः, पोपूरः,
पूरितुम्, पूरयितुम्, पुपूरिषितुम्, पोपूरितुम् ;
[5]पूर्तिः [पूर्णिः], पूरणा, पुपूरिषा, पोपूरा ;
पूरणम्, पूरणम्, पुपूरिषणम्, पोपूरणम् ;
पूरित्वा, पूरयित्वा, पुपूरिषित्वा, पोपूरित्वा ;
प्रपूर्य, प्रपूर्य, प्रपुपूरिष्य, प्रपोपूर्य ;
[6]चर्मपूरं स्तृणोति । उदरपूरं भुङ्क्ते ।

---

1. 'णेर्विभाषा' (8-4-30) इति सूत्रस्य नेदं लक्ष्यम्। यत्रोपसर्गस्थान्निमित्तात् कृत्स्थस्य नकारस्य णत्वम्, तत्रैव तस्य सूत्रस्य प्रवृत्तिः। अत्र तु धातुस्थान्निमित्तात् रेफरूपात् णत्वमिति ज्ञेयम्। तेन नित्यणत्वमेव।
2. '**श्वीदितो** निष्ठायाम्' (7-2-14) इतीण्निषेधः। णत्वम्।
3. 'वा दान्तशान्त**पूर्ण**दस्तस्पष्टच्छन्नज्ञप्ताः' (7-2-27) इत्यनेन ण्यन्तादस्मान्निष्ठायां पक्षे अनिट्त्वं निपात्यते। अनिट्पक्षे, णिलुकि णत्वे **पूर्णः** इति, इट्पक्षे **पूरितः** इति च रूपम्।
4. '**अनुदात्तेतश्च हलादेः**' (3-2-149) इति तच्छीलादिषु कर्तृषु युच्। अनादेशे णत्वे च रूपमेवम्। **पूरणः**=समुद्रः।
5. 'क्तिन् आबादिभ्यः' (वा. 3-3-94) इति क्तिन्; अप्रत्ययापवादः। 'तितुत्र—' (7-2-9) इतीण्निषेधः। **पूर्णिः** इति तु बाहुलकात् निप्रत्यये णत्वे च रूपम्।
6. '**चर्मोदरयोः पूरेः**' (3-4-31) इत्यनेन चर्मोदरयोः कर्मणोरुपपदयोः णमुल्प्रत्ययः। **पूरयतेः** 'धातुसम्बन्धे प्रत्ययाः' (3-4-1) इति परिभाषया धातुसम्बन्धे विधानात् धात्वन्तरस्य प्रयोगः। एवम् **उदरपूरम्** इत्यत्रापि ज्ञेयम्।